## ।। अथ एकत्रिंशोऽध्याय: ।। chapter-31

वसिष्ठ उवाच :- ततो गच्छेन्महाराज प्रतीच्यां दिशि मानव: ।।
यत्र क्षेमंकरी देवी गिरिशृङ्गमुपस्थिता ।। १

यां दृष्ट्वा मानवो भक्त्या लोकेशां लोकवत्सलाम् ।।
प्रयाति योगिनां स्थानं जरामरणवर्ज्जितम् ।। २

मान्धातोवाच :- कथं क्षेमंकरी देवी गिरे: शिखरमास्थिता ।।
किमर्थमवतारोऽस्या भूतले भूतपोधन ।। ३

वसिष्ठ उवाच :- इतस्त्रिंशत्तमेऽतीते द्वापरेऽभून् महासुर: ।।
उग्रौजा इति ख्यातो देवब्राह्मणकण्टक: ।। ४
१
तेन विप्रद्रुता: सर्वे द्विजा: श्रीमालवासिन: ।। ५

दिवा प्रविशतेम्भोधौ स्क रात्रौ विद्राव्य देहिन: ।।
दधान: परशुं हस्ते वामे चर्म तथोत्वजम् ।। ६

२
आक्रम्य द्विजवर्याणां गोधनानि हतानि वै ।।
पलायमाना गोपाला निहता हन्त भूरिश: ।। ७

---

१ बी ई- विप्रकृता: (ए १) विद्राव्य दे: हिन:
२ बी हृतानि

आश्रमाणां द्रुमाः सर्वे च्छिन्नमूला महीं ययुः ।।
वनोपान्तेषु हर्म्याणि दैवतानां महान्ति च ।। ८

हतानि पादपा तेन पातितानि दुरात्मना ।।
क्षिप्तानि देवखातेषु वापीषु विविधासु च ।। ९

हत्वा पशुसहस्राणि द्रुतास्तेन[1] द्विजोत्तमाः ।।
सम्भूय मन्त्रयाञ्चक्रुः कृतिनस्ते परस्परम् ।
उत्तमौजोविनाशाय किंचिन्नोपायमाययुः ।। १०

कदाचिदथ दैत्येन्द्रः प्राप्तवान् गौतमाश्रमम् ।
मुनिं तत्रैकमग्राहीज्जपध्यानपरायणम् ।। ११

गृहीतः सोऽथ दैत्येन[2] प्राक्रोशदिदमुच्चकैः ।। १२

ब्राह्मण उवाच :- उत्तमौजा महादैत्यो मामयं हन्तुमुद्यतः ।।
त्राहि त्राहि[3] तपोनिष्ठ शृणोषि यदि गौतम ।। १३

----

१ वी दूनास्तैन    ( ए १) दैवतानां महान्तिच

२ ए दैत्यनैं

३ ए तापी

वसिष्ठ उवाच :- इत्याक्रोशति विप्रेन्द्रे त्रस्ता: सर्वे द्विजोत्तमा: ।।
गौतमं शरणं जग्मुस्त्राहि त्राहीतिवादिन: ।। १४

गौतम उवाच :- मा भैमाभैष्ट मा भैष्ट दैतयादुत्तमौजस: ।।
अयमेतद्वधार्थाय सुरेशामाह्वयाम्यहं ।। १५

वसिष्ठ उवाच :- इत्युक्त्वाथ समिद्धाग्नौ कुशस्तम्बं जुहाव स: ।।
तत: सावित्रीमन्त्रेण मुनि: क्रोधाकुलेक्षण : ।। १६

निर्जगाम तत: देवी शक्तिशूलधरानलात् ।।
उवाच तपसां श्रेष्ठं गौतमं किं तवेप्सितम् ।। १७

करोमीति सहोवाच जहि दैत्यं सुरेश्वरि ।।
ततस्तमभिदुद्राव देवीतंब्रह्मविद्विषम् ।। १८

दैत्योऽपि वीक्ष्य तां रौद्रीं मुमोच ब्राह्मणं क्षणात्
तामापतन्तीं सहसा वन्हिज्वाला मिवोधतां[1] ।।
[2]चिक्षेप परशुं दैत्यस्तिष्ठ तिष्ठेति चाब्रवीत् ।। १९

----

१ ई वी विमोचिताम्
२ ई चिक्षेपपशुंदैत्य
१ ए ब्रह्म

तमाकाशगतं तीव्रं कुठारं हुंकृतेच्छया ॥
ज्वालयैवादहद्देवी भस्मीभूय स चापतत् ॥ २०

तस्मिन्निपतिते व्यर्थे हुङ्कृत्या भस्मसात्कृते ॥
उत्तमौजास्तु तद्वीर्यपलायनपरोऽभजत् ॥ २१

ततो देवी जगन्माता द्विजानां त्राण[1]कारिणी ॥
पश्यतां सर्वलोकानामिदमाहोत्तमौजसम् ॥ २२

देव्युवाच :- अहो ब्रह्मद्विषंस्तुभ्यं गन्तुं दास्यामि न क्वचित् ॥
हते त्वयि भवेद्दत्तं प्राणदानं द्विजन्मनाम् ॥ २३

वसिष्ठ उवाच :- इत्याभाष्य महाशूलं मुमोच महिषमर्दिनी ॥
तेनास्य[2] दाक्षिणं जानुं भित्वा भूतलमाविशत् ॥ २४

ततः क्रुद्धो महीपाल दैत्यो तुल्यपराक्रमः ॥
नयनै भ्रामयामास राहुश्चन्द्ररवी यथा ॥ २५

----

१ बी ई प्राण रक्षिणी
श्लोक २१ नहीं
२ बी सचास्य

श्लोक

बबन्ध भृकुटिं भाले क्रोधताम्रमभून् मुखम् ।
सम्विलोक्य दिशः सर्वाः शिलामेकां महोन्नताम् ।। २६

वेगादुत्पाद्य चिक्षेप देव्यै कन्दुकवद् बली ।। २७

पतन्तीं तामथ स्कन्धे दुःसहां वीक्ष्य भामिनी ।।
वाममुष्टिप्रहारेण चूर्णयामास लीलया ।। २८

व्यर्थीभूते शिलापाते दैत्यस्यामितजसः[१] ।।
प्रशंसन्ति द्विजाः सर्वे साधुसाध्विति चाब्रुवन् ।। २९

अथ शक्तिं महोदग्रां कृत्वा देवी कराम्बुजे ।।
तोलयामास वै दुर्गा वधाय ब्राह्मणद्विषः ।। ३०

उत्तमौजास्तु हस्ताग्रे देव्याः शक्तिं विलोकयन् ।।
चिक्षेप शतशो वृक्षानुन्मूल्य च शिला घनाः ।। ३१

सिंहनादरवांश्चक्रे दन्तिनिष्पेष बृंहितान्[२] ।।
तान् सर्वानवधूयाशु देवी दीनार्तिहारिणी ।। ३२

----

सी (क ख) दन्ति निष्पेषाबृंहितान् १, डी ई दन्ति नः शेषबृंहितान्
१ ए दैत्यस्यामितजस (ए २) बृंहितान्

भ्रामयित्वा शतगुणं तत्क्षणाच्छक्तिमाक्षिपत् ।। ३३
सीमन्तमिव कुर्वाणा दिव: सा काञ्चनोज्ज्वला ।।

शक्तिर्बिभेद दैत्यस्य तस्य वक्षोऽस्थिपंजरम् ।। ३४

स पपात महीपृष्ठे मूर्च्छित: शक्तिभेदनात् ।।
क्षणादथ विनिर्धूर्य[1] शक्तिं तां हृदयाद् बली ।। ३५

अभ्यधावन् महादेवी मुखं व्यादाय पार्थिव ।।
आपतन्तमथो वीक्ष्य तं जगत्त्रासकारिणम् ।। ३६

अभाषत शिवां देवी गौतमो व्योममास्थित: ।। ३७

गौतम उवाच :- दैत्योऽयं शस्त्रपातेन देवि नाशं न यास्यति ।।
अस्य तुष्टो महादेवो सिन्धुतीरे तपस्यत: ।। ३८
दुष्टस्य दत्तवान् देव: शस्त्रचापैरवध्यताम् ।। ३९

वसिष्ठ उवाच :- इत्यूर्णोर्वचनं श्रुत्वा गौतमस्य महात्मन: ।।
दिशो विलोकयामास जिघांसुस्तं महासुरम् ।। ४०

-----

१ ए घूर्य

अथ वैभाद् गिरेः शृंगं समुत्पाद्य सपादर्कं।
मुमोच शिरसि क्रोधाद् दानवस्यौचमौजस? ।। ४१

ततौ मुमुदिरे देवा द्विजेन्द्राश्च विशांपते ।।
तुष्टुबुस्तां मनोज्ञैरिष्टैः दैवीं सुक्तैः पुरातनैः ।। ४२

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च मुदिता भृशम् ।।
परितस्तां समावव्रुः प्रणमन्तौ मुहुर्मुहुः ।। ४३

बाला युवत्यौ वृद्धाश्च ब्राह्मणानां कुलस्त्रियः
अक्षतैः सिषिचुर्दैवी परिम्राम्य पटाञ्चलात् ।। ४४

प्रमोदाश्रुजलस्त्रावैः क्लिद्यन्तौ रौरवाजिनं।।
जयेतिवादिनः सर्वे नमश्चक्रुश्च नैष्ठिकाः ।। ४५

पिहिते गिरिशृंगेण दानवे ह्युत्तमौजसि ।।
तुष्टाव दैवदैवशां गौतमो रचितांजलिः ।। ४६

----

१ ई परितस्रवजुः प्रणाम तौमुहुर्मुउः ।।
१ ए क्रोधादृानवस्यौ
(ए२) तुष्ठाव

गौतमउवाच :- आतमैतत्वया मातर्द्विजानां पुरममुत्तमं ।।
कृता: धर्माश्च बल्मानो मुनीनां बनचारिणाम् ।। ४७

ईशानवरदर्पिष्ठं पयौनिधिनिकेतनम् ।।
क: शक्तस्त्वामृते देवि हन्तुमेनं महासुरम् ।। ४८

दृष्टे रूपद्रुत दुर्गे जगज्जीवति न क्वचित् ।।
न चैत्वमनुगृह्णासि करुणापरमाणुना ।। ४६

महः किमहमीशानि तव वर्णयितुं क्षम: ।।
यस्मिन् ब्रह्मादयो देवा: स्फुलिङ्गा इव निर्ययु: ।। ५०

आयुधानि दधाना त्वं मातर्मोहयसे जगत् ।।
दृगेव तव संहन्त्री धूम्रलोचन विद्विषाम् ।। ५१

ईशे विश्वोपकारीरिण रूपाणि तव यानि वै ।।
शरीरिभिरूपास्यन्ते सूक्तानीव मनीषिणाम् ।। ५२

----

१ ई शबमैतत्वया (ए ३) गृह्णासि
२ ई तद: (ए ४) रुणा
(ए ५) शारीरिभि

वपु: सांसारिकं माता पुष्णाति स्तन्यपायिनी ।।
उभयात्मकमप्यम्ब त्वं तु ध्यानामृतैर्निजै: ।। ५३

सर्वे दुष्टग्रहा: पुंसां शरीरेभ्यो पयान्ति हि ।।
देवि त्वद्भक्तियोगेन दमेन विषया इव ।। ५४

त्वमस्य जगतो धात्री पृथ्वीरूपेण संस्थिता ।।
अन्यथा मृन्मयं चक्रं कथं तिष्ठेन्महोदधौ ।। ५५

श्रुतिस्त्वं सर्वशास्त्राणां गरिष्ठासि सुरेश्वरि ।।
वरिष्ठासि वरेण्यानां पवित्राणां च पावनी ।। ५६

मंगल्या मंगलानां त्वं देवानामसि देवता ।।
वस्तुभूतं हि पश्यामि न जातु जगतीगतं ।।
बिभर्ति नामरूपे यद्विनाभूतं त्वदंम्बिके ।। ५७

नमोस्तु वरदे देवि प्रपन्नार्तिहरे शुभे ।।
एवमेव त्वया विश्वं त्रातव्यमिदमीश्वरि ।। ५८

----

१ ई वपु:
२ ख डी ई पावना
३ ख डी २ विनासूतैत्वयाम्बिके ।।

श्लोक ~~श्लोक~~

मंगल्या मंगलानांचदेवानासि देवता ।

(५६) पाविनी

श्री देव्यवाच :- श्रीमालवासिनां तुष्टा द्विजानामस्मि गौतम् ।।
तदैत यद्यपिच्छिन्ति तद्दास्याम्यसंशयं ।। ५६

वसिष्ठ उवाच :- इति देव्या समाज्ञप्तं निशम्य द्विजपुङ्गवैः ।।
प्रेरितो गौतमः प्राह देवीं मधुरया गिरा ।। ६०

गौतम उवाच :- प्रार्थयन्ति द्विजा देवि तवात्र स्थितिमन्वहं ।।
गिरै श्रृङ्गेऽस्य दैत्यस्य पुनरुत्थानशङ्किताः ।। ६१

देव्युवाच :- पादेनाक्रम्य शैलस्य श्रृङ्गमेतन्महोन्नतम्[१] ।।
स्थास्यामि गौतमाजस्त्रं द्विजाः सन्तु गतज्वराः ।। ६२

गौतमाहुतिसंदीप्त[२] वह्निज्वालोत्थया मया ।।
उत्पातजसमाहत्य दैत्यं शम्भुवरोर्जितम्[३] ।। ६३

श्रीमालेऽत्र कृताः क्षौमाः[४] पन्थानः पुरवासिनाम् ।।
तस्मात् क्षौमकरीत्याख्या मम लोके भविष्यति ।। ६४

---

१ बी ई महोन्नतम २ बी गौतम ! ब्रूहि
३ बी ई शम्भुवरोद्धतम् ४ डी ई मोक्षाः
५ बी ई क्षौमकरी नामभम्

( ए १) तनहोन्नतं
( ए २) गौतमाहूतिसंडीप्त

स्थितामामिह यै मर्त्या दिव्यमाबिभ्रतीं वपु: ।।
द्रक्ष्यन्ति, ते प्रयास्यन्ति तेनैव वपुषा दिवं ।। ६५

तथेत्युक्त्वा महादेवीं द्विजा: सर्वे ययुर्गृहान् ।।
देवाश्च त्रिदिवं याता विस्मयोत्फुल्ललोचना: ।। ६६

ततो राजन् दिगन्तेभ्य: श्रीमालं प्राप्य मानवा: ।।
क्षेमंकरीमुखालोकाद्दिवं यान्ति निरागस: ।। ६७

अग्निष्टोमादिमियागैरपि वर्षशतं कृतै: ।।
स्वयं देहेन न स्वर्ग: प्राप्यते य: पुरा नरै: ।। ६८

श्रीमाले स तदादूराद्दुपेतैरपि पाप्मभि : ।।
क्षेमंकरीमुखं दृष्ट्वा प्रवेदे लीलया नृप ।। ६९

न यजन्ति न यच्छन्ति नाचरन्ति जपक्रियाम् ।।
न जुह्वत्यनले केचित्त्यक्तध्याना नरा भुवि ।। ७०

स्वच्छन्दं मानवै लोके क्रीडित्वा यावदीप्सितम् ।।
प्रणम्य देवदेवशां यान्ति स्वर्गमितः[1] क्षणात् ।। ७१

अथाऽभूल्लोकसम्बाधः शैलेन्द्रस्त्रिदशालयः ।।
क्रियाः प्रणष्टा यज्ञानां जाताः क्षीणबलाः सुरा।। ७२

अथालोच्य मिथो देवास्तूर्णं श्रीमालमाययुः ।।
क्षेमंकरी प्रणम्योच्चैरिदंवचनमब्रुवन् ।। ७३

देवाऊचुः नष्टा देवि क्रियाः सर्वा वर्णानां विहिताः पृथक् ।।
त्वामवेद्य दिवं यान्ति विना कर्माणि[4] मानवा ।। ७४

वेदा व्यर्थीभविष्यन्ति कर्मानुष्ठानमंत्तरा ।।
अस्माकं त्वत्कृतो देवि तद्यं मास्तु वै क्षयः ।। ७५

देव्युवाच :- मया रभसवैवश्याद् विस्तीर्णो[2] यं वरो नृणाम् ।
अधुना तु[3] किमिच्छन्ति मया श्रेयः कृतं सुराः ।। ७६

---

१ बी मृता:
२ बी मया रभसवैवश्याद् वितीर्णोऽयं वरो नृणाम्
३ बी त्वत्
४ ए कर्माणि

देवाऊचु :-

देवि स्वर्गं समायातु भवती सह देवतैः ॥

श्रीमाले पादुकान्यासं कृत्वा लोकहिताय वै ॥ ७७

पुंष्पया
आर्धो ह्यंकाकान्तं गिरिश्रृंगमसौ धाम: ॥

न जातु जगतां मातक्षमौजा महासुर: ॥ ७८

सप्तबाराह्निस्यन्ति पादुकां ये तवाम्बिके[1] ॥

त्रिदिवं[3] प्रयास्यन्ति यदि पापशतैर्युता: ॥ ७९

अत्र दानं प्रशंसन्ति वासांसि विविधानि च ॥

हैमं चैव यथा[2] शक्त्या तस्य तुष्येत् सुरेश्वरी ॥ ८०

भूषणानि प्रयच्छन्ति समुद्दिश्य सुरेश्वरीम् ॥

तेषां देवि जगन्माता ऐश्वर्यं यच्छ[4] ददते ॥ ८१

वसिष्ठ उवाच :- इत्युक्ता सा तदा देवी निजे विन्यस्य पादुके ॥

गिरिश्रृंगे तत: प्रायात् सहदेवैर्दिवं प्रति ॥ ८२

---

१ बी नरोऽम्बिके

२ बी यथाशक्ति

३ ए त्रिदिवं

४ ए च्छति महा

इत्थं क्षेमंकरी दैवी श्रीमालेऽभूत् पुरा नृप ।।
पादुकादर्शनाद्यस्या नरः पापात्प्रमुच्यते ।। ८३

क्षेमंकरीकथामेतां यः शृणोति समाहितः ।।
तस्य पापानि नश्यन्ति तमः सूर्योदये यथा ।। ८४

सर्वापत्सु महाराज ध्येया नित्यं नरोत्तमैः ।।
वाञ्छितार्थकरी दैवी गिरिशृंगमुपस्थिता ।। ८५

ते धन्यास्ते कुलीनाश्च श्रीमन्तस्ते यशस्विनः ।।
येषां क्षेमंकरी दैवी कुले भूदधिदैवता ।। ८६

यथा करोति जननी शिशूनां त्राणमन्वहं ।।
तथा क्षेमंकरी दैवी भक्तानां त्राणकारिणी ।। ८७

उपानद्दानमात्रेण नराणां तत्र सूरयः ।।
प्राप्ति वरिविमानस्य कथयन्ति चिरं नृप ।। ८८

---

इति श्री स्कंदपुराणे एकाशीति साहस्त्र्यां संहितायां बालखिभागे तृतिये परिच्छेदे श्रीमालमाहात्म्ये क्षेमंकरी माहात्म्यं नामैक त्रिंशोऽध्यायः ।।
३१

१ वी मनीषिण :